# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| कक्षा- आचार्य-२ (SEM-3) | प्रश्नपत्र-४ | गुणाः - ७० |
|---|---|---|
| विषयः- धर्मशास्त्रम् | CC539 | समयः - ११ तः ०२ |
| दिनाङ्कः - २८/११/२०१६ | सन्दर्भग्रन्थः - गौतमधर्मसूत्रम् | |

---

**॥ प्रथमान्वितिः ॥**

**प्र-१ कस्यचिदेकस्य सूत्रस्य ससन्दर्भं व्याख्या कार्या । ०४**

१. अनुज्ञात उपविशेत् प्राङ्मुखो दक्षिणतः शिष्यः उदङ्मुखो वा ।

२. गृहस्था सदृशीं भार्यां विन्देताऽनन्यपूर्वां यवीयसीम् ॥

**प्र-२ कमप्येकं सूत्रं विस्तरेण विवेचयत । १२**

१. ग्रन्थोक्तदिशा ब्रह्मचारिधर्मान् प्रतिपादयत ।

२. अनिचयोः भिक्षुः सूत्रमिदं विविच्य संन्यासधर्मं प्रतिपादयत ।

**प्र-३ द्वयोः लघूत्तरं लिखत । ०४**

१. ब्राह्मणस्य उपनयनं कस्मिन् वर्षे भवेत् ?

२. बैल्वपालाशौ कस्य दण्डौ ?

३. गौतमधर्मसूत्रे कति प्रश्नाः ?

४. प्रथमे प्रश्ने कति अध्यायाः ?

**॥ द्वितीयान्वितिः ॥**

**प्र-४ कस्यचिदेकस्य सूत्रस्य ससन्दर्भं व्याख्या कार्या । ०४**

१. ऋतावुपेयात् इत्यस्य सूत्रस्य व्याख्यां कृत्वा गृहस्थधर्मान् प्रतिपादयत ।

२. आपत्काल्यो ब्राह्मणस्य अब्राह्मणाद् विद्योपयोगः इति सूत्रं विविच्य आपत्कालधर्मान् प्रतिपादयत ।

**प्र-५ कस्याप्येकस्य समीक्षा कार्या । ०८**

१. नित्यस्वाध्यायः ।

२. अभिवादनविधिः ।

**प्र-६ त्रयाणामतिलघूत्तराणि लिखत । ०३**

१. कदा स्वाध्यायः कर्तव्यः ?

२. महद्भ्यः बलिहरणं कुत्र कर्तव्यम् ?

३. ब्रह्मणे बलिहरणं कुत्र कर्तव्यम् ?

४. कस्य नाम न गृह्णीयात् ?

**॥ तृतीयान्वितिः ॥**

**प्र-७ कस्यचिदेकस्य सूत्रस्य ससन्दर्भं व्याख्या कार्या । ०४**

१. नित्यं शुचिः सुगन्धिः स्नानशीलः ।

२. राज्ञोऽधिकं रक्षणं सर्वभूतानाम् ।

**प्र-८ कस्याप्येकस्य सविस्तरमुत्तरं लिखत । ०८**

१. गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरणान्नप्राशन-चौलोपनयनम् ।

२. द्विजातिनामध्ययनमिज्यादानम् इति सूत्रं विविच्य वर्णधर्मान् प्रतिपादयत ।

**प्र-९ त्रयाणामतिलघूत्तराणि लिखत । ०३**

१. कानि त्रीणि कर्माणि ?

२. कति वेदव्रतानि ?

३. धर्मशब्दस्य कोऽर्थः ?

४. सूत्रशब्दस्य का व्याख्या ?

**॥ चतुर्थान्वितिः ॥**

**प्र-१० कस्यचिदेकस्य सूत्रस्य ससन्दर्भं व्याख्या कार्या । ०४**

१. कर्षक-वणिक्-पशुपाल-कुसीदि-काखः स्वेस्वे वर्गे ।

२. न्यायाधिगमे तर्कोऽभ्युपायः ।

**प्र-११ कस्याप्येकस्य विस्तरेण उत्तरं लिखत । १२**

१. ग्रन्थदिशा राजधर्मान् विवेचयत ।

२. ग्रन्थदिशा न्यायनिर्णयं लिखत ।

**प्र-१२ कयोश्चित् द्वयोः टिप्पणी लेख्या । ०४**

१. समः प्रजासु स्यात् ।

२. हितमासां कुर्वीत ।

३. शुचिः ।

४. वर्णाः ।

---